श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुःसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःसप्ततितमः सर्गः ॥

## नारदेन श्रीरामं प्रति तपस्विनः शूद्रस्याधर्माचरणमेव विप्रबालकमरणे कारणमिति कथनम्

तथा तु करुणं तस्य द्विजस्य परिदेवनम्।
शुश्राव राघवः सर्वं दुःखशोकसमन्वितम्॥ **7.74.1** ॥

स दुःखेन च सन्तप्तो मन्त्रिणस्तानुपाह्वयत्।
वसिष्ठं वामदेवं च भ्रातॄंश्च सह नैगमान्॥ **7.74.2** ॥

ततो द्विजा वसिष्ठेन सार्धमष्टौ प्रवेशिताः।
राजानं देवसङ्काशं वर्धस्वेति ततोऽब्रुवन्॥ **7.74.3** ॥

मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च काश्यपः।
कात्यायनोऽथ जाबालिर्गौतमो नारदस्तथा॥ **7.74.4** ॥

एते द्विजर्षभाः सर्वे आसनेषूपवेशिताः।
महर्षीन् समनुप्राप्तानभिवाद्य कृताञ्जलिः॥ **7.74.5** ॥

मन्त्रिणो नैगमाश्चैव यथार्हमनुकूलतः।
तेषां समुपविष्टानां सर्वेषां दीप्ततेजसाम्॥ **7.74.6** ॥

राघवः सर्वमाचष्टे द्विजोऽयमुपरोधते।
तस्य तद् वचनं श्रुत्वा राज्ञो दीनस्य नारदः॥ **7.74.7** ॥

प्रत्युवाच शुभं वाक्यमृषीणां सन्निधौ स्वयम्।
शृणु राजन् यथाकाले प्राप्तो बालस्य सङ्क्षयः॥ **7.74.8** ॥

श्रुत्वा कर्तव्यतां राजन् कुरुष्व रघुनन्दन।
पुरा कृतयुगे राजन् ब्राह्मणा वै तपस्विनः॥ **7.74.9** ॥

अब्राह्मणस्तदा राजन् न तपस्वी कथञ्चन।
तस्मिन् युगे प्रज्वलिते ब्रह्मभूते त्वनावृते॥ **7.74.10** ॥

अमृत्यवस्तदा सर्वे जज्ञिरे दीर्घदर्शिनः।
ततस्त्रेतायुगं नाम मानवानां वपुष्मताम्॥ **7.74.11** ॥

क्षत्रिया यत्र जायन्ते पूर्वेण तपसान्विताः।
वीर्येण तपसा चैव तेऽधिकाः पूर्वजन्मनि॥ **7.74.12** ॥

मानवा ये महात्मानस्तत्र त्रेतायुगे युगे।
ब्रह्म क्षत्रं च तत् सर्वं यत् पूर्वमवरं च यत्॥ **7.74.13** ॥

युगयोरुभयोरासीत् समवीर्यसमन्वितम्।
अपश्यन्तस्तु ते सर्वे विशेषमधिकं ततः॥ **7.74.14** ॥

स्थापनं चक्रिरे तत्र चातुर्वर्ण्यस्य सम्मतम्।
तस्मिन् युगे प्रज्वलिते धर्मभूते ह्यनावृते॥ **7.74.15** ॥

अधर्मः पादमेकं तु पातयत् पृथिवीतले।
अधर्मेण हि संयुक्तस्तेजो मन्दं भविष्यति॥ **7.74.16** ॥

आमिषं यच्च पूर्वेषां राजसं च मलं भृशम्।
अनृतं नाम तद् भूतं पादेन पृथिवीतले॥ **7.74.17** ॥

अनृतं पातयित्वा तु पादमेकमधर्मतः।
ततः प्रादुष्कृतं पूर्वमायुषः परिनिष्ठितम्॥ **7.74.18** ॥

पातिते त्वनृते तस्मिन्नधर्मेण महीतले।
शुभान्येवाचरन् लोकः सत्यधर्मपरायणः॥ **7.74.19** ॥

त्रेतायुगे च वर्तन्ते ब्राह्मणाः क्षत्रियाश्च ये।
तपोऽतप्यन्त ते सर्वे शुश्रूषामपरे जनाः॥ **7.74.20** ॥

स्वधर्मः परमस्तेषां वैश्यशूद्रं तदागमत्।
पूजां च सर्ववर्णानां शूद्राश्चक्रुर्विशेषतः॥ **7.74.21** ॥

एतस्मिन्नन्तरे तेषामधर्मे चानृते च ह।
ततः पूर्वे पुनर्वासमगमन्नृपसत्तम॥ **7.74.22** ॥

ततः पादमधर्मस्य द्वितीयमवतारयत्।
ततो द्वापरसङ्ख्या सा युगस्य समजायत॥ **7.74.23** ॥

तस्मिन् द्वापरसङ्ख्ये तु वर्तमाने युगक्षये।
अधर्मश्चानृतं चैव ववृधे पुरुषर्षभ॥ **7.74.24** ॥

अस्मिन् द्वापरसङ्ख्याने तपो वैश्यान् समाविशत्।
त्रिभ्यो युगेभ्यस्त्रीन् वर्णान् क्रमाद् वै तप आविशत्॥ **7.74.25** ॥

त्रिभ्यो युगेभ्यस्त्रीन् वर्णान् धर्मश्च परिनिष्ठितः।
न शूद्रो लभते धर्मं युगतस्तु नरर्षभ॥ **7.74.26** ॥

हीनवर्णो नृपश्रेष्ठ तप्यते सुमहत्तपः।
भविष्यच्छूद्रयोन्यां हि तपश्चर्या कलौ युगे॥ **7.74.27** ॥

अधर्मः परमो राजन् द्वापरे शूद्रजन्मनः।
स वै विषयपर्यन्ते तव राजन् महातपाः॥ **7.74.28** ॥

अद्य तप्यति दुर्बुद्धिस्तेन बालवधो ह्ययम्।
यो ह्यधर्ममकार्यं वा विषये पार्थिवस्य तु॥ **7.74.29** ॥

करोति चाश्रीमूलं तत्पुरे वा दुर्मतिर्नरः।
क्षिप्रं च नरकं याति स च राजा न संशयः॥ **7.74.30** ॥

अधीतस्य च तप्तस्य कर्मणः सुकृतस्य च।
षष्ठं भजति भागं तु प्रजा धर्मेण पालयन्॥ **7.74.31** ॥

षड्भागस्य च भोक्तासौ रक्षते न प्रजाः कथम्।
स त्वं पुरुषशार्दूल मार्गस्व विषयं स्वकम्॥ **7.74.32** ॥

दुष्कृतं यत्र पश्येथास्तत्र यत्नं समाचर।
एवं चेद् धर्मवृद्धिश्च नृणां चायुर्विवर्धनम्।
भविष्यति नरश्रेष्ठ बालस्यास्य च जीवितम्॥ **7.74.33** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुःसप्ततितमः सर्गः॥